Shodhshauryam, International Scientific Refereed Research Journal
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 5
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# काव्येषु नाटकं रम्यम्

राजश्री जेना
शोधच्छात्रा, साहित्यविभाग:, केन्द्रीयसंस्कृतविश्वविद्यालय:(श्रीसदाशिवपरिसर:, पुरी)

**Article Info**

Accepted : 03 Oct 2024
Published : 12 Oct 2024

**Publication Issue :**
September-October -2024
Volume 7, Issue 5

**Page Number :** 05-07

**सारांश:** - रङ्गस्थलस्योपरि प्रदर्शनयोग्यं द्रष्टुं योग्यं च यद् भवति तत् दृश्यकाव्यम् इत्युच्यते। प्रदर्शनार्थं यदनुकूलं भवति तत् दृश्यकाव्यं भवति। दृश्यकाव्यं रुपकम् अथवा नाटकम् वा नाम्ना व्यवह्रियते। दृश्यकाव्यं द्विधा वर्गीकर्तुं शक्यते। ते च – १. रूपकानि २. उपरूपकानि च। धनञ्जय: दशरूपके रूपकाणि लक्षणभेदेन दशधा विभक्तवान्।

**नाटकं प्रकरणं भाण: प्रहसनं डिम:।**
**व्यायोग समवकारौ वीथ्यङ्केहामृग इति॥**

एतेषु नाटकं रम्यत्वेन साहित्यसमाजे प्रसिद्धं वर्तते। अत: मया **काव्येषु नाटकं रम्यम्** इति शीर्षकमाश्रित्य शोधलेख: विलिखित:।

**विशेषशब्दा:** – नाटकम्, काव्यभेदा:, काव्यम्, नाटकम्, नाटकस्य स्वरूपं, नाटकस्य महत्त्वम् इत्यादय:।

नाटकं संस्कृतसाहित्यस्य गौरवपूर्णविधास्ति। नाट्यसाहित्येनैवाद्य संस्कृतसाहित्यस्य कीर्तिकौमुदी जगति सर्वत्र व्याप्ता दरीदृश्यते। काव्येषु नाटकं श्रेष्ठं मन्यते। कालिदासस्य 'अभिज्ञानशाकुन्तलम्' तु नाटकरत्नम् एव विद्यते। अस्य रमणीयता अपूर्वा एव अस्ति। अनेन नाटकेन कालिदासस्य कीर्ति: न केवलं भारते, अपितु विदेशेषु अपि प्रसारिता, भारतीयनाट्यरचनाया: प्रयोजनं नितान्तं गम्भीरं व्यापकं सार्वभौमयञ्चास्ति। 'प्रयोजनमनुदिश्य मन्दोऽपि न प्रवर्तते' इति वचनानुसारं प्रयोजनमूलैव सर्वेषां प्रवृत्ति:। रसास्वादन-आनन्दानुभूतर्वा काव्यादे: अध्ययनस्य प्रयोजनमिति। काव्यरसस्य आनन्दाय कवित्वमयवातावरणस्य महत्यावश्यकता वर्तते, अत: केवलं सहृदयमानव: एव काव्यानन्दसन्दोहे निमज्जितुं समर्थ:। परं नाटके वातावरणं स्वयमेव उपस्थाप्यते, अस्माद् कारणादेव नाटकं सर्वसाधारणाय बोधगम्य: प्रभावशाली चास्ति, वस्तुत: नाटकं काव्यस्य चरमसीमा मन्यते – "नाटकान्तं कवित्वम्।" नाटकस्य उद्देश्यानि महत्वपूर्णं विद्यते।

काव्यमस्माकं भावानाम् उत्सर्जनमस्ति। मानव: चेतनासम्पन्न: संवेदनशीलप्राणी चास्ति। तस्य मन: शशीरमाधृत्य दु:खेन, सुखेन, प्रेम्णा, दयया, क्रोधेन च चलायमानं भवति। काव्येन मानवस्य भावात्मकविकासो भवति।

सार्वजनिकमनोरञ्जनाय साधनं भवति नाटकम्। नाटकस्य निर्माणं सर्वजनहिताय सर्वजनसुखाय च भवति। यतो हि देवसमाजहितचिन्तनेच्छया ब्रह्मणा नाटकस्य सृष्टि: कृता –

**"क्रीडनीयकमिच्छामि दृश्यं श्रव्यं च यद् भवेत्।**
**तस्मात् सृजापरं वेदं पञ्चमं सार्ववर्णिकम॥ "**

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

**काव्यभेदाः -** काव्यं द्विविधम् – लौकिकं वैदिकं च। वैदिकं वेदब्रह्मणादिः ईश्वरप्रोक्तम्। लौकिकं तु रामायणमहाभारतादिः। गद्यपद्यभेदेन तच्चतुर्धा। यथोक्तम् –

**“वैदिकं लौकिकं चेति द्विविधं काव्यमुच्यते।**
**गद्यपद्यविभेदेन तच्चतुर्धा व्यवस्थितम्॥ ”**

लौकिककाव्यं द्विधा विभज्यते – दृश्यं श्रव्यं च। श्रवणयोग्यं काव्यं श्रव्यकाव्यमुच्यते। काव्य–महाकाव्य–गीतिकाव्यादिभेदेन बहुविधम्। दर्शनयोग्यं काव्यं दृश्यकाव्यमुच्यते। दृश्यकाव्यम् अभिनेयं भवति। उक्तं विश्वनाथेन –

**“दृश्यश्रव्यभेदेन पुनः काव्यं द्विधा मतम्**
**दृश्यं तत्राभिनेयं तद्रूपाशेपात्तु रूपकम्॥**
**अवस्थानुकृतिर्नाट्यम् रूपकं तत्समारोपात्॥ ”**

संस्कृतसाहित्ये गद्यपद्ययोरनन्तरं रूपकस्य प्रमुखं स्थानमस्ति। अवस्थाविशेषस्य अनुकरणं कृत्वा आनन्दं मनोरञ्जनञ्च ‘नाटकम्’ इति कथ्यते। गद्यकाव्यानि, पद्यकाव्यानि च श्रव्यकाव्येष्वन्तर्भवन्ति, यथा  कथा, आख्यायिका इत्यादयः। रूपकं तु दृश्यकाव्येष्वन्तर्भवन्ति। श्रव्यकाव्यशिक्षणे श्रवणेन्द्रियमेव कार्यं करोति। दृश्यकाव्यशिक्षणसमये श्रवणेन्द्रियं चक्षुरिन्द्रियम् उभेऽपि कार्यं कुरुतः। अतः श्रव्यकाव्यापेक्षया दृश्यकाव्यस्यैव अत्यधिकं प्रमुख्यम् अस्ति। नाटकस्य संस्कृते विशिष्टं स्थानं वर्तते। ‘नाटकम्’ शब्दोऽयं ‘नट्’ धातोः निष्पन्नो वर्तते यस्यार्थमस्ति – नृत्यम्, अभिनयः, अनुकरणञ्च।

**नाटकानां रम्यत्वम् -** काव्यविधासु सर्वासु ‘नाटकम्’ सर्वोत्कृष्टत्वेन मन्यते। यतः साक्षात् रूपेण दर्शनस्य सुविधा अस्ति। संस्कृतसाहित्ये बहूनि नाटकानि निबद्धानि, तेषु सर्वेषु अभिज्ञानशाकुन्तलम् इति निर्विवादेन उत्कृष्टं मन्यते विद्वद्भिः। यतोक्तम् –

**“काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।**
**तत्रापि च चतुर्थोऽङ्कः सत्र श्लोकचतुष्टयम्॥ ”**

वस्तुतः नाटकमेतत् सर्वात्मना सफलं रम्यं च वर्तते। अस्मिन् नाटके, वर्णननैपुण्यं, घटनासंयोजनं, प्रसादगुणसम्पन्ना वैदर्भीरीतिः, चरित्रचित्रणस्य चातुर्य, प्रकृतिवर्णनं, स्वाभाविकं चित्रणम्, अलङ्कारयोजना, रसपरिपाकश्च सर्वमेव सर्वातिशायित्वेन विराजते।

**नाटकस्य स्वरूपम्-** “रूपयतीति रूपकम्”, “तद्रूपारोपात्तु रूपकम्”, तद्रूपकमभेदो यः उपमा–उपमेययोः। उमानोपमेययोः साम्यप्रदर्शनाय काल्पनिकोऽभेदारोपः रूपकम्। रूपकं संस्कृतसाहित्यस्य एकं गौरवपूर्णमङ्गमस्ति। नाटकानां कवित्वम्। काव्येषु नाटकं रम्यम्। रूपकस्य प्रवर्तकः भरतमुनिः रूपकं सार्ववर्णिकपञ्चमवेद इति वर्णितम्। यथा –

**“जग्राह पाठ्यम् ऋग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानार्थवणादपि॥ ”**[1]

इत्यनेन सिद्ध्यति यत् नाट्याख्यं पञ्चमं वेदम्।

[1]. नाट्य

**संस्कृतसाहित्ये नाटकानां महत्वम् -** नाटकं भिन्नरूचेर्जनस्य मनोरञ्जनस्य साधनमेव। नाट्ये न कोऽपि भावो विषयो वा अवशिष्यते। अत्र सर्वेऽपि रसा निबद्धः। अत्र यथास्थानं पुरुषार्थचतुष्टयं चतुर्वर्गो वा संगृह्यते। यथा नाट्यशास्त्रे उक्तम् -

**"क्वचित् धर्मः क्वचित् क्रीडा क्वदिचदर्थः क्वचिच्छमः।**
**क्वचिद् हास्यं क्वचिद् युद्धं क्वचित् कामः क्वचिद्वधः॥ "**[2]

नाटकं शक्तिहीनहृदि शक्त्याः सञ्चारं करोति, उत्साहं वर्धयति, ज्ञानं प्रददाति च। नाटकं लोकवृत्तस्यानुकरणस्ति -

**"नानाभावोपसम्पन्नं नानावस्थान्तरान्मकम्**
**लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्॥ "**[3]

**उपसंहारः-** इदं मानवजीवनं समविषमं सुखदुःखादि अनुभूतिप्रधानमस्ति। दैनन्दिनश्रामिककार्मिककर्षकजीवने श्रान्ताः जनाः मानसिकम् आनन्दं प्राप्नुवन्ति। दुःखान्तानां श्रमान्तानां, शोकार्तानां, तपस्विनां कृते विश्रान्तिकल्पनम्। यथा नाट्यशास्त्रे भरतेन सविस्तरं व्याख्यायते -

**"दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विश्रान्तिजननं काले नाट्यमेतद् भविष्यति॥ "**[4]

मनोरञ्जनस्य साधनेषु नाटकं लोकप्रियम् अस्ति। अतः केनापि कविना सम्यक् एव उक्तम्-

**"काव्येषु नाटकं रम्यम्।"**

**सहायकग्रन्थसूची**

1. काव्यप्रकाशः, मम्मटः, आचार्यविश्वेश्वर, ज्ञानमण्डललिमिटेड, वाराणसी
2. काव्यादर्शः, महाकविदण्डी, आचार्यः श्रीरामचन्द्रः, चैखम्बा विद्याभवन, दिल्ली – 2005
3. काव्यानुशासनम्, श्रीहेमचन्द्रः, चैखम्बा विद्याभवन्, वाराणसी
4. काव्यालंकारः, रुद्रटः, नमिसाधुकृतटीकासहितम्, मोतीलालबनारसीदासः, दिल्ली
5. काव्यालङ्कारः, भामहः, डॉ. रमानन्दशर्मा, चैखम्बसंस्कृतसीरीज अफिस्, वाराणसी
6. दशरूपकम्, धनञ्जयः, डा. रामजी उपाध्यायः, भारतीय विद्या संस्थान, वाराणसी- 2000
7. ध्वन्यालोकः, आनन्दवर्धनः, मोतिलाल् बनारसी दास, वाराणसी, 1963
8.र सगङ्गाधरम्, पण्डितराज जगन्नाथः, बनारस् हिन्दु यूनिवर्सिष्टी, बनारस्- 1970
9. संस्कृत वाङ्गमय का बृहद् इतिहास, प्रो. भोलाशङ्कर व्यास, उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ
10. संस्कृत साहित्य का अभिनव इतिहास, प्रो. राधावल्लभ त्रिपाठी, विश्वविद्यालयप्रकाशन, वाराणसी
11. संस्कृतवाङ्मय का विवेचनात्मक इतिहास, प्रो. सूर्यकान्तशास्त्री, ओरिएण्ट लागमैन, नई दिल्ली- 1972

[2]. नाट्य – 1.18

[3]. नाट्य – 1/111

[4]. नाट्य – 1/115